# संस्कृत वार्ता:

दिनाङ्क : 29/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणः मोदिनः मध्य-एशिया-प्रवासः प्रारब्धः , उज्बेकिस्तान-किर्गिज़-देशाभ्यां सह द्विपक्षीय-वार्तायाः रूपरेखा च सज्जीकृता।
- भारतं स्व-सभ्यतायाः सामर्थ्यस्य च बलेन जगति गौरव-स्थानं प्राप्नोति इति राजनाथ-सिंहस्य वक्तव्यम्।
- नेपाले हृदयविदारकाप्लावे हतानां सङ्ख्या षड्विंशत्यधिकषड्शतं यावत् अभवत् । भारतीय-दलेन आपत्-उद्धार-कार्याणि च तीव्रीकृतानि।
- अमेरिकी-राष्ट्रपतिना डॉनाल्ड-ट्रम्प इत्यनेन वेनेज़ुएला देशेन सह तैलसंधेः महती घोषणा विहिता ।
- ओडिशा-राज्ये शनि-रविवासरयोः अति-वृष्टिपरा नारंगवर्णीया संचेतना ।
- हॉकी-निपुणं मेजर-ध्यानचन्दं संस्मृत्य देशे अद्य क्रीडा-दिवसः आयोज्यते । प्रधानमन्त्रिणा मोदिना मेजर-ध्यानचन्द-वर्याय श्रद्धाञ्जलिः अर्पिता, क्रीडकानां समर्पणस्य च भूरिशः प्रशंसा कृता।

-------------------------------------------------------

<u>प्रधानमंत्री</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रात: उज्बेकिस्तान, किर्गिज-गणराज्यस्य च चतुर्दिवसीय यात्रायै प्रस्थितवान्। श्रीमोदिना प्रस्थानात् प्राक् भणितं यत् एतस्या: यात्राया: उभयोर्देशयो: मध्ये भारतस्य रणनीतिक-परस्परता, सम्पृक्तता च दृढयिष्यते। प्रधानमन्त्रिणा प्रोक्तं यत् असौ उज्बेकिस्तानीय राष्ट्रपतिना शफ़कत मिर्जियोयेफ-वर्येण साकं व्यापार-निवेश-डिजिटल-सम्पर्क-रक्षोर्जा-क्षेत्रे सहयोगं विवर्धयितुं चर्चां विधास्यति। एतेन सहैव विकसित भारत-दिशि अपि सम्भाषणं भविष्यति। उज्बेकिस्ताने भारतस्य राजदूतेन स्मिता पंतेन आकाशवाण्या सह विशिष्टे

साक्षात्कारे भणितं यत् उज्बेकिस्ताने प्राकृतिक-संसाधनानां भण्डारो विद्यते। तया प्रोक्तं यत् उभयो: देशयो: मध्ये निवेश-महत्वपूर्ण-खनिज-क्षेत्राणां हस्तांतरणे चर्चा अपि संभाव्यते।

----------------------------------------------------------

<u>उत्तरप्रदेश: राजनाथ:</u>

रक्षामन्त्री राजनाथसिंह: अद्य उक्तवान् यत् भारतं केवलं अर्थव्यवस्थारूपेण न अपितु स्वीय सभ्यता-संस्कृति, सामर्थ्येन, आत्मविश्वासेन च विकसित-राष्ट्ररूपेण उदितमस्ति। लखनऊ नगरे बाबा साहेब-भीमराव-अम्बेडकर-विश्वविद्यालयस्य एकादशे दीक्षान्त-समारोहे भाषमाण: श्रीसिंह: उक्तवान् यत् यदा भारतदेश: किमपि वदति तदा सम्पूर्ण: विश्व: श्रृणोति। असौ भणितवान् यत् नवभारतस्य महान् परिवर्तनम् इदम् अस्ति यत् देश: न केवलं वैश्विक-नियमान् अनुसरति अपितु तेषां निर्माणे अपि योगदानं ददाति।

----------------------------------------------------------

<u>नेपाल-जलपूर:</u>

नेपाल-देशे जलपूर-विभिषिकायां मृतकानां संख्या षड्विंशत्युत्तर-षड्शत-सञ्जाता । द्विसहस्राधिकाश्च जना: लुप्ता: सूच्यन्ते। आरक्षिदलेन त्रयस्त्रिंशदुत्तर-द्विशतात्मका: शवा: चितवान जनपदे अधिगता:। पश्चिम-नवलपारासी क्षेत्रे अष्ट-पञ्चाशदुत्तरैकशत, गोरखायाम् अष्टचत्वारिंशत् शवा: अधिगता:। एतदतिरिच्य बहुषु क्षेत्रेषु बहव: मृतावशेषा: सम्प्राप्ता:। हिमालयीय-क्षेत्रे प्रभावितेषु जनपदेषु साह्ययोद्धार-कर्याणि द्रुतगत्या प्रचलन्ति। विदेश-मन्त्रालयेन सूचितं यत् विंशत्युत्तर-त्रिंशत् भारतीय-नागरिका: साम्प्रतमपि विलुप्ता: । विदेश-मन्त्रालयस्य प्रवक्त्रा रणधीर-जायसवालेन नवदिल्ल्यां वार्ताहरै: सह सम्लपन् प्रोक्तवान् यत् भारतीय-मूलस्य आहत्य शताधिका: जना: अधुना अपि सम्पर्क-विहीना: सन्ति। अत्रान्तरे नेपाल प्राधिकरणेन ऊनत्रिंशदुत्तर-द्विशत-अज्ञात-शवा: अपि अधिगता:। चितवान-जनपदे चिकित्सालये-उपचाराधीना: व्रणिता: जना: उपाचारे-समस्या: सम्मुखी कुर्वन्ति।

----------------------------------------------------------

<u>नेपाल-राष्ट्रपति:</u>

नेपाल देशस्य राष्ट्रपतिः रामचन्द्र-पौडेलः अद्य भारतीय-राष्ट्रपतिं द्रौपदी मुर्मुं प्रति कृतज्ञतां ज्ञापितवान्। नेपाल देशे विनाशकारी आकस्मिक-जलप्रवाहे शतशः जनाः मृताः, व्यापकः विनाशः च जातः। अस्मिन् समये भारतीय प्रशासन द्वारा प्रदत्तायै सहायतायै समर्थनाय च पौडेल-वर्येण धन्यवादः प्रकटितः । असौ बुधवासरे सञ्जाते अस्मिन् जलाप्लावे भारतीय-जनानां मृत्योः विषयेऽपि शोकं अभिव्यक्तवान्।

------------------------------------------------------------

__मन की बात__

प्रधानमन्त्री नरेन्द्र-मोदी श्वः आकाशवाणीतः स्वीये मन की बात इति मासिक-कार्यक्रमे भारतीयैः सह स्वोद्गारान् प्रकटयिष्यति। कार्यक्रमस्य अस्य इदं सप्तत्रिंशदुत्तर-शततमं संस्करणं विद्यते। कार्यक्रमोऽयं आकाशवाणी-दूरदर्शनस्य च सर्वासु वाहिनीषु सम्प्रसार्यते। एतदतिरिच्य यू-ट्यूब, डीडी न्यूज, सूचना-प्रसारण-मन्त्रालये सर्वत्र अस्य कार्यक्रमस्य प्रसारणं भविष्यति।

------------------------------------------------------------

__सीतारामन् - यू.एस__

शिकागो-नगरे आयोजिते 'बिज़नेस् राउण्डटेबल्' सम्मेलने वित्तमन्त्री निर्मला सीतारामन् न्यगादीत् यत् भारतस्य आर्थिक-प्रगतिः, कुशल-जनशक्तिः, आधुनिक-संरचना च वैश्विक-निवेशकान् आकर्षयन्ति। मन्त्रिणा उद्घोषितं यत् भारतं न केवलं व्यापार-स्थलम्, अपितु जगति उत्पादन-प्रदानस्य विशाल-केन्द्रम् अस्ति। वित्त-मन्त्री 'आत्मनिर्भर-भारतम्' तथा आई.डी.ई.एक्स.' सदृशानाम् उपक्रमाणाम् उल्लेखं कुर्वती उक्तवती यत् भारतं ड्रोण् , स्वायत्त-प्रणाली इत्यादीनाम् आधुनिक-प्रद्योगिकीनां क्षेत्रे स्वदेशी-सामर्थ्यं वर्धयति। सा वैश्विकनिवेशकान् सह-विकासाय सह-उत्पादनाय च आमन्त्रितवती, भारतं केवलं सेव्य-विपणिरूपेण न दृष्ट्वा अपितु विश्व-निर्माणस्य मञ्चरूपेण स्वीकर्तुम् सा न्यवेदयत्।

------------------------------------------------------------

## अमेरिका-वेनेजुएला

अमेरीकी राष्ट्रपतिना डॉनाल्ड-ट्रम्पेण वेनेजुएला देशेन साकं बृहत्तम-तैल-सन्धिः घोषणा विहितास्ति। वेनेजुएला देशेन साकं अस्मात् सन्धेः अमेरिका देशः पञ्चषष्टिः अर्बुद् बैरल-तः अधिक-असंशोधित तैल-भण्डारणे –नियन्त्रणं स्थापयिष्यति।

-------------------------------------------------------

## ईरान

इरान-देशस्य राष्ट्रपतिः मसूद-पेज़ेश्कियन् प्रावोचत् यत् तेहरान-नगरात् अमेरिका-देशेन सह कूटनीतिक-वार्तायै द्वारम् उद्घाटितम् अस्ति, तथापि वाशिङ्गटन्-प्रशासनं प्रति सावधानता अपि परिपालनीया अस्ति। तेन उक्तं यत् यदि अमेरिका-देशः संधिनिष्ठां दर्शयति, तर्हि इरानः अपि स्व-प्रतिबद्धतां परिपालयिष्यति। एकस्मिन् दूरदर्शन-साक्षात्कारे पेज़ेश्कियन् इत्यनेन प्रोक्तं यत् कूटनीतिक-प्रयत्नाः जून-मासे हस्ताक्षरितस्य शान्ति-सहमति-पत्रस्य पुनः सक्रियीकरणे केन्द्रिताः भवितुं शक्नुवन्ति। तेन उल्लिखितं यत् अस्य संधेः क्रियान्वयन-काले इरानेन नवति-मिलियन् बैरल्-मितं खनिज-तैलम् निर्यातितम्।अपरे सन्देशे इरानस्य सर्वोच्च-नेत्रा मुजतबा-खामेनेइ इत्यनेन देशस्य आर्थिक-जीविकोपार्जन-सङ्कटेभ्यः मुद्रास्फीतेः , वृत्याभाव-समस्यायाः अथ विपणि-मूल्य-नियन्त्रणस्य च गभीर-समाधानाय आह्वानं विहितम्। असौ स्वदेशी-उत्पादनस्य प्रोत्साहनं कुर्वन् आवश्यकतानुसारेण आयातस्य विवेकपूर्ण-उपयोगाय बलम् अयच्छत्।

-------------------------------------------------------

## ऋतुविभागः

ऋतुविज्ञान-विभागेन ओडिशायां आगामि सोमवासरं यावत् भीषणातिभीषण-वृष्टेः नारंग-संचेतना प्रसारिता । भीषण-वृष्टेः कारणात् बिहार-पश्चिम-बंगालः, झारखण्ड-मध्यप्रदेश-छत्तीसगढस्य च बहुषु क्षेत्रेषु वृष्टिः संभाव्यते । आगामि द्वि-त्रि-दिवसेषु भीषण-वृष्टिः भविष्यति इति ऋतुविज्ञान-विभागेन संसूचितम्।

-------------------------------------------------------

## राष्ट्रीय-क्रीडा-दिवसः

भारतस्य महान्तं क्रीडा-नायकं हॉकी-प्रवीणं मेजर-ध्यानचन्द-वर्यं संस्मर्तुं तस्य जन्म-जयन्त्याम् अद्य समग्रे देशे 'राष्ट्रीय-क्रीडा-दिवसः' सोल्लासेन आयोज्यते। एषः दिवसः भारतस्य समृद्धं क्रीडा-वैभवं दर्शयति, जन-सामान्यं च स्व-दैनिक-जीवनस्य नियमित-भागरूपेण क्रीडाः अंगीकर्तुं प्रेरयति। प्रधानमन्त्री नरेन्द्र मोदी मेजर-ध्यानचन्द-वर्याय भावाञ्जलिं समर्पयन् अवदत् यत् हॉकी-क्षेत्रे तस्य अतुलनीयं योगदानं सर्वदा राष्ट्राय प्रेरणा-स्रोतः स्थास्यति।

---------------------------------------------------------

## महिला-हॉकी

महिला-हॉकी-विश्वचषके भारतीय-दलेन इतिहासः रचितः। जर्मनी-दलं त्रिणि-एकं इत्यंकैः पराजित्य भारतेन पञ्चमं स्थानं प्राप्य सर्वोत्कृष्टं प्रदर्शनं कृतम्। अस्याः ऐतिहासिक-सफलतायाः कृते हॉकी-इण्डिया-संस्थया दलाय पंचाशत् लक्ष-रूप्यकाणां पुरस्कारः घोषितः। अद्य रात्रौ विश्वचषकस्य चरम-क्रीडायाम् नेदरलैण्ड्स्-अर्जेंटीना-दले परस्परं स्पर्धिष्येते।

।। इति वार्ता: ।।